नृसिंहदेवाय नमः

# A Outline of *Rasa* Theory (रस-तत्वस्य अवधारणा)

*SUDIP CHAKRAVORTTI*

*DEPARTMENT OF SANSKRIT*

*SIDHO-KANHO-BIRSHA UNIVERSITY*

# Objectives:



- to give a general idea
- to show its source
- to show different theories
- to compare them

Dr. Sudip Chakravortti, Department of Sanskrit, Sidho-Kanho-Birsha University

# DICTIONARY MEANING of *Rasa*











1. Juice

2. Extract

3. Pleasure




*Madhura Kaṭu, Tikta, Kaṣāya, Lavaṇa & Amla*

by tongue

Rasa (Pārada): 69 treatment for Rasajīrṇa in *Rasaśāstra*

in Āyurveda

**Rasa**

Water, Fragrance, Fluid, Semen, Poison etc.

Ecstasy, Delight, Epiphany

in Aesthetics

# Vedic Source –

**रसशब्दः** ऋग्वेदे सोमरस-जल-क्षीर-सारार्थेषु प्रयुक्तः
**रसशब्दः** अथर्ववेदे रुच्यर्थे प्रयुक्तः
उपनिषत्काले तस्य सारः इत्यर्थः सम्पन्नः
जगतः परमसारभूतः शाश्वतानन्दसन्धायकः परमात्मा रसपदार्थः

Raso vai saḥ

raso hyevāyaṁ labdhvānandī bhavati
… eṣa hyevānandayāti

*Taittirīyopaniṣat* 7/2

## Non-Vedic Source :

सरति इति रसः – सरणशीलः / द्रवणशीलः / प्रवहमानः

रस्यते आस्वाद्यते इति रसः – आस्वादनक्रिया

N.B. > ***आस्वादनीयोऽर्थश्च नाम्रचूतादिफलम् किन्तु रत्यादिः चित्तवृत्तिः***

न हि रसादृते कश्चिदर्थः प्रवर्तते - आनन्ददायकः

Although the concept of *rasa* is fundamental to many forms of Indian arts including dance, music, theatre, painting, sculpture, and literature; the interpretation and implementation of a particular rasa differs between different styles and schools.

# आस्वादनीयो रत्यादिः रसः

तल्लक्षणं चोक्तं दर्पणकारेण –

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः ।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः ॥
लोकोत्तरचमतकारप्राणः कैश्चित् प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ॥ २/३.

यद्यप्यत्र आस्वादनं कथमित्युच्यते तथापि तेन सह तस्य लक्षणमपि स्पष्टं विदितं भवति ।

ननु काव्ये कथं तस्य निष्पत्तिः? उच्यते, उक्तं भरतेन –

**विभावानुभाव-व्यभिचारि-संयोगाद्रसनिष्पत्तिः ।**

अस्यायमर्थः - काव्ये विभावः अनुभावः व्यभिचारिभावश्चेति एतेषां बुद्धौ यदा समावेशो भवति तदा स्थायी भावो रसो निष्पद्यते । एतेन विभावादित्रयं निष्पादकं भवति, रत्यादिश्च निष्पाद्यः, सहृदयस्य चित्तं च तन्निष्पत्तौ अधिकरणम् इत्युक्तम् ।

# विभावादयश्च के इति जिज्ञासायां मम्मट आह काव्यप्रकाशे –

कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥
विभावा अनुभावास्तत्कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ॥

लोकदृष्ट्या रत्यादिं चित्तवृत्तिं प्रति यत् कारणम्, यत् कार्यम्, यच्च सहकारिकारणं तान्येव काव्ये विभावादिशब्देन व्यपदिश्यन्ते इति बोध्यम् ।

तत्र विभाव्यते आविष्क्रियतेऽनेन रत्यादिरिति विभावः ।
आविर्भावे आविर्भावितस्य उद्दीपने च साधनमित्यर्थः ।
अत एव तदालम्बनम् उद्दीपनं चेति द्विविधम् ।

अनुभाव्यते प्रतीतिविषयीक्रियते रत्यादिः येन कार्यरूपेणेति अनुभावः । रत्यादेः कार्यविशेष इति यावत् ।

व्यभिचरन्ति विशेषेण रत्यादेः आभिमुख्येन चरन्तीति व्यभिचारिणः । ते च निर्वेदादयः त्रयस्त्रिंशत् गुरुदेवादिविषयिका रतिश्चेति चतुस्त्रिंशत् ।

# Bharata's *Rasastutra* (भरत-कृत-रस-सूत्रम्)

**विभावानुभाव-व्यभिचारि-संयोगाद्रसनिष्पत्तिः**

Joining together of

*Vibhāva* (causes),

*anubhaāas* (consequents)

and *Vyabhicāris* (transitory feelings)

create *Rasa*

- Word *saṁyoga* and ***niṣpatti*** are ambiguous

- Role of *Sthāyī* is not directly indicated

2

# Application of विभावानुभाव-व्यभिचारि-संयोगाद्रसनिष्पत्तिः

Vibhāva (Determinants) — Kāraṇa (Mṛttikā)

- **1. Ālambana : Helps / attempts to rouse Sthāyi** [viṣaya, subject]
- **2. Uddīpana : Glows / spreads Sthāyi** [āśryaya, incidents, situations]

Anubhāva (Consequents) — Kārya (Ghaṭa)

- **Makes believable Sthāyi** [abhinaya, physical postures]

**Vyabhicāri** (Transitories) — Nimitta / Sahakārī Kāraṇa (Cakra, Kumārasya pitā etc.)

- **Nourishes Sthāyi** [nirveda, despodency]

# Vibhāva




तदालम्बनम् उद्दीपनं चेति द्विविधम् । स आलम्बनविभाव इत्युच्यते, यमालम्ब्य रत्यादिः आविर्भवति, यथा – शकुन्तलामालम्ब्य रतिराविर्भवतीति दुष्यन्तनिष्ठां रतिं प्रति शकुन्तला आलम्बनविभावः । दुष्यन्तमालम्ब्य च रतिराविर्भवतीति शकुन्तलानिष्ठां रतिं प्रति दुष्यन्तोऽपि । यथा च – दुर्योधनमालम्ब्य क्रोध आविर्भवतीति भीमसेननिष्ठक्रोधं प्रति दुर्योधन आलम्बनविभावः । एवमन्यदपि बोध्यम् । स पुनः उद्दीपनविभाव इत्युच्यते, येन आविर्भूतस्य रत्यादेरुद्दीपनं भवति, यथा – दुष्यन्तनिष्ठां शकुन्तलाविषयिकां शकुन्तलानिष्ठां च दुष्यन्तविषयिकां रतिमुद्दीपयतीति चन्द्रिकाभ्रमरझङ्कारप्रभृतयः उद्दीपनविभावाः । एवमन्यदपि बोध्यम् ।

अनुभाव्यते प्रतीतिविषयीक्रियते रत्यादिः येन कार्यरूपेणेति अनुभावः । रत्यादेः कार्यविशेष इति यावत्, यथा – दुष्यन्तस्य शकुन्तलाविषये रतौ सम्भवन्त्यां कटाक्षविक्षेप-आलिङ्गन-अधरपान-चुम्बनादयः कार्यविशेषाः सम्भवन्ति, । एवं शकुन्तलाया अपि दुष्यन्तविषये रतौ जातायां स्वेद-रोमाञ्च-पलायनादयः सम्भवन्ति । एते अनुभावाः ।

# Anubhāva (Consequents)

| Āṅgika | Vācika | Āhārya | Sāttvika |
|---|---|---|---|
| Physical Postures | Dialougues – Word & Meaning | Costumes | Psychological |

# Source – S Gawde



# Source – S Gawde

## व्यभिचारीभावs-Transitory emotions

- विविधम् आभिमुख्येन रसेषु चरन्तीति व्यभिचारिण:।
- Opposite to *Sthayi bhava*
- Not confined to particular *rasa*
- Subordinate in *rasa*
- Like the waves of ocean
- Strengthens *Sthayi*

©Shakuntala Gawde

Example : When Saptarshis were talking about the marriage of proposal of Shiva with Parvati's parents, Parvati was counting the petals of the lotus.

(Parvati's *lajja* in *Kumarasambhavam* suggested from above verse)

व्यभिचरन्ति विशेषेण रत्यादेः आभिमुख्येन चरन्तीति व्यभिचारिणः । ते च निर्वेदादयः त्रयस्त्रिशंत् गुरुदेवादिविषयिका रतिश्चेति चतुर्त्रिंशत् ।
ते यथा काव्यप्रकाशे –

निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥
सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिशंदमी भावाः समाख्यातास्तु नामतः ॥
रतिदेर्वादिविषया व्यभिचारी तथाञ्चितः ॥
भावः प्रोक्तः . . . . . . . . . . . . . . . . . ।

# Eight *Rasa*

एतैः त्रिविधैरर्थैः सहृदयस्य चित्तेऽभिव्यक्तो रत्यादिः स्थायी भावो रसो भवति । ननु स्थायी कः? उच्यते, चित्ते चिरं वर्तमानत्वात् रत्यादिः स्थायीत्युच्यते, तदुक्तम् –

चिरं चित्तेऽवतिष्ठन्ते सम्बध्यन्तेऽनुबन्धिभिः ।
रसत्वं प्रतिपद्यन्ते प्रवृद्धाः स्थायिनोऽत्र ते ॥

एते च रत्यादयः अष्टौ, यथा –

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥

ननु चित्तवृत्तित्वाविशेषात् निर्वेदादीनामपि स्थायित्वमस्तु – मैवम्, संसारचक्रे भ्रमतां समेषां प्राणिनां चित्ते एतावतामेव सर्वदा वर्तमानत्वम् । तस्मात् तावतामेव स्थायित्वम् नान्येषाम् । अत एवाभिहितम् अभिनवभारत्याम् – स्थायित्वमेतावतामेव । जातो हि जन्तुरियतीभिरेव संविद्भिः परीतो भवति । यद्यपि कस्यचित् पुंसो निर्वेदादिः भावान्तरस्यापि जन्मान्तरेषु बाहुल्येन अनुभवात् जन्मन्यस्मिन् चित्ते चिरमवस्थानं सम्भवति तथापि तत् केवलं तन्मात्रस्य पुंसः न तु सर्वेषाम् ।

इह तु सर्वपुरुषाभिप्रायेणैव स्थायिनां निरूपणं महर्षिणा कृतमिति दोषाभावः । नन्वत्र कस्यचित् स्थायिनः केचित् भावा विरोधिनो भवन्ति केचिच्च अविरोधिनः । एवं स्थिते कथं सर्वैरपि भावैः स्थायिनः पोषणमिति कथमेतत् युज्यते? सत्यम्, अत एवोक्तम् –

विरुद्धैरविरुद्धैर्वा भावैः विच्छिद्यते न यः ।
आत्मभावं नयत्यासौ स स्थायी लवणाकरः ॥

# Nine *Rasa*

| | स्थायी | रस |
|---|---|---|
| १ | रति (love) | शृङ्गार (Erotic) |
| २ | हास (laughter) | हास्य (Laughter) |
| ३ | शोक (Grief) | करुण (Pathos) |
| ४ | क्रोध (Anger) | रौद्र (Furious) |
| ५ | उत्साह (Enthusaism) | वीर (Heroic) |
| ६ | भय (Fear) | भयानक (Terrible) |
| ७ | जुगुप्सा (disgust) | बीभत्स (Loathsome) |
| ८ | विस्मय (Wonder) | अद्भुत (Marvellous) |
| ९ | निर्वेद (Detachment) | शांत (Peace) |

तत्र रतिः विभावादिभिः अभिव्यक्ता शृङ्गारो भवति, हास्यो हास्यः, शोकः करुणः, क्रोधो रौद्रः, उत्साहो वीरः, भयं भयानकः, जुगुप्सा बीभत्सः, विस्मयश्च अद्भुत इति शृङ्गारादयः अष्टौ रसाः ।

ननु एतावन्त एव यदि रसाः तर्हि नव रसा इति कथं प्रवादः?

उच्यते, अष्टौ रसा इति तु विकृतिरसाभिप्रायेण । प्रकृतिभूतस्तु रसः कश्चिद्वर्तते । स च शान्तः ।

तस्यापि उपसंख्यानेन कथने तु नव रसा इत्येव न्याय्यम् ।

रसेषु हि प्रकृतिविकृतिभावो महर्षिणोऽपि सम्मतः, यदाह -

**स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते ।**
**पुनर्निमित्तापाये शान्ते एवोपलीयते ॥**

प्रकृतिविकृतिभावश्च तन्तुपटयोरिव मृद्घटयोरिव च न सांख्यैरङ्गीकृतः किन्तु प्रसन्नक्षुभितसरोवरयोरिव लौकिकः ।

लोके हि प्रसन्ने सरोवरे 'प्रकृतिरियम्' इति बुद्धिर्जायते । तदेव शिलापातनादिना यदि क्षुभितं क्रियते तर्हि 'विकृतिरियम्' इति बुद्धिः ।

एवं चित्तं यदा प्रसन्नम् अर्थात् निर्विकारं भवति तदा शान्तो रसः । यदा तु विकारयुक्तं तदा शृङ्गारादिकं रसान्तरम् ।

तत्र काव्यदृष्ट्या यदा शृङ्गारादिः तदा शास्त्रदृष्ट्या धर्मार्थकामाः त्रयः पुरुषार्थाः ।

यदा तु काव्यदृष्ट्या शान्तः तदा शास्त्रदृष्ट्या तु मोक्षः । एतेन विषयाभिमुख्ये सति धर्मादयः त्रयः पुरुषार्था भवन्ति शृङ्गारादयश्च रसाः ।

यदा तु विषयवैमुख्यं तदा मोक्षः पुरुषार्थः शान्तश्च रस इत्युक्तं भवति ।

# Eleven *Rasa*, Source - http://hindigrammar.in/ras.html

## रस के प्रकार

रस के ग्यारह भेद होते है- **(1) श्रृंगार रस (2) हास्य रस (3) करूण रस (4) रौद्र रस (5) वीर रस (6) भयानक रस (7) बीभत्स रस (8) अदभुत रस (9) शान्त रस (10) वत्सल रस (11) भक्ति रस ।**

**रस के प्रकार**

| रस | स्थायी भाव | उदाहरण |
|---|---|---|
| **(1) श्रृंगार रस** | रति/प्रेम | (i) संयोग श्रृंगार : बतरस लालच लाल की, मुरली धरी लुकाय।<br>(संभोग श्रृंगार): सौंह करे, भौंहनि हँसै, दैन कहै, नटि जाय। (बिहारी)<br>(ii) वियोग श्रृंगार : निसिदिन बरसत नयन हमारे<br>(विप्रलंभ श्रृंगार): सदा रहित पावस ऋतु हम पै जब ते स्याम सिधारे।। (सूरदास) |
| **(2) हास्य रस** | हास | तंबूरा ले मंच पर बैठे प्रेमप्रताप,<br>साज मिले पंद्रह मिनट, घंटा भर आलाप।<br>घंटा भर आलाप, राग में मारा गोता,<br>धीरे-धीरे खिसक चुके थे सारे श्रोता। (काका हाथरसी) |
| **(3) करुण रस** | शोक | सोक बिकल सब रोवहिं रानी।<br>रूपु सीलु बलु तेजु बखानी।।<br>करहिं विलाप अनेक प्रकारा।।<br>परिहिं भूमि तल बारहिं बारा।। (तुलसीदास) |
| **(4) वीर रस** | उत्साह | वीर तुम बढ़े चलो, धीर तुम बढ़े चलो।<br>सामने पहाड़ हो कि सिंह की दहाड़ हो।<br>तुम कभी रुको नहीं, तुम कभी झुको नहीं।। (द्वारिका प्रसाद माहेश्वरी) |
| **(5) रौद्र रस** | क्रोध | श्रीकृष्ण के सुन वचन अर्जुन क्षोभ से जलने लगे।<br>सब शील अपना भूल कर करतल युगल मलने लगे।<br>संसार देखे अब हमारे शत्रु रण में मृत पड़े।<br>करते हुए यह घोषणा वे हो गए उठ कर खड़े।। (मैथिली शरण गुप्त) |
| **(6) भयानक रस** | भय | उधर गरजती सिंधु लहरियाँ कुटिल काल के जालों सी।<br>चली आ रहीं फेन उगलती फन फैलाये व्यालों-सी।। (जयशंकर प्रसाद) |
| **(7) बीभत्स रस** | जुगुप्सा/घृणा | सिर पर बैठ्यो काग आँख दोउ खात निकारत।<br>खींचत जीभहिं स्यार अतिहि आनंद उर धारत।।<br>गीध जांघि को खोदि-खोदि कै मांस उपारत।<br>स्वान आंगुरिन काटि-काटि कै खात विदारत।। (भारतेन्दु) |
| **(8) अदभुत रस** | विस्मय/आश्चर्य | आखिल भुवन चर-अचर सब, हरि मुख में लखि मातु।<br>चकित भई गद्गद् वचन, विकसित दृग पुलकातु।। (सेनापति) |
| **(9) शांत रस** | शम/निर्वेद (वैराग्य/वीतराग) | मन रे तन कागद का पुतला।<br>लागै बूँद बिनसि जाय छिन में, गरब करै क्या इतना।। (कबीर) |
| **(10) वत्सल रस** | वात्सल्य रति | किलकत कान्ह घुटरुवन आवत।<br>मनिमय कनक नंद के आंगन बिम्ब पकरिवे घावत।। (सूरदास) |
| **(11) भक्ति रस** | भगवद विषयक रति/अनुराग | राम जपु, राम जपु, राम जपु बावरे।<br>घोर भव नीर-निधि, नाम निज नाव रे।। (तुलसीदास) |

# Pāṇaka-rasa-nyāya / Pra-pāṇaka-rasa-nyāya

Rasa is only a composite culture of *vibhāvas* etc. which have undergone the modification in form just as the ingredients of *Pāṇaka*-juice undergo a change, so the idea of manifestation of *rasa* as such is not tenable.

The idea of equation to illustrate the view-point is found in the *Nāṭyaśāstra* itself under rasa-manifestation. The sage brings in the comparison in the light of Sanskrit Poetics, the *pra-pāṇaka-rasa-nyāya* may be the actual theory to explain the meaning of *rasa*.

*Tāmbula*, the betel is a widely used matter to taste the charm of betel role. The leaf of betel, lime, areca-nut, anise, coriander, clove, cardamom etc. and other elements are being rolled carefully in betel-role. Then people take an amazing taste of betel-role by chow the same.
There different ingredients are present. All of them bear different taste. But, after a few moment of chowing, one another unforgettable perception of taste is being felt. The *rasa* is more or less same like that.

According to *Sāhitydarpaṇa* all the ingredients like *vibhava* etc. mix together (blend) for susceptible connoisseur and become the enjoyable *rasa* just like *Prapāṇaka*-juice.

*Vakroktijīvita* explains that in the case of Pāṇaka, there emerges a new taste due to the commingling of all ingredients even though each possesses a distinct taste. Similarly even in the case of *rasa* it is a new aspect due to evocation over the nature of all factors like *vibhāva* etc.

# Main Four Doctrines of Sanskrit *Rasa* Theory
# संस्कृत-रस-तत्वे प्रधान-मत-चतुष्टयम्

| | |
|---|---|
| ***Bhaṭṭalollaṭa*** | **Utpattivāda** |
| ***Śaṅkuka*** | **Anumitivāda** |
| ***Bhaṭṭanāyaka*** | **Bhuktivāda** |
| ***Abhinavagupta*** | **Abhivyaktivāda** |

2

# BHAṬṬALOLLAṬA – *UTPATTIVĀDA* (THEORY OF FORMATION / DERIVATION)

SELECTED TEXT FROM – ***ABHINAVABHARATĪ*** OF ABHINAVAGUPTA:

संयोगाद्रसनिष्पत्तिः। अत्र भट्टलोल्लटप्रभृतयस्तावदेवं व्याचख्युः—विभावादिभिः संयोगोऽर्थात् स्थायिनस्ततो रसनिष्पत्तिः। तत्र विभावश्चित्तवृत्तेः स्थाय्यात्मिकाया उत्पत्तौ कारणम्। अनुभावाश्च न रसजन्या अत्र विवक्षिताः। तेषां रसकारणत्वेन

तथा गणनानर्हत्वात्। अपि तु भावानामेव। विभावा अनुभावाश्च चित्तवृत्त्यनात्मकत्वात् यद्यपि न सहभाविनः स्थायिना तथापि वासनात्मकतेह तेषां विवक्षिता। दृष्टान्तेऽपि व्यञ्जनादिमध्ये कस्यचिद्वासनात्मकता स्थायिवत्। अन्यस्योद्भूतता

व्यभिचारिवत्। तेन स्थाय्येव विभावानुभावादिभिरुपचित रसः। स्थायी भवत्वनुपचितः। स चोभयोरपि। [मुख्यया वृत्त्या रामादौ] अनुकार्ये; अनुकर्तर्यपि चानुसन्धानबलात्—इति।

एष: 'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापार:' इति वदन् अभिधातिरिक्तं व्यापारं नाङ्गीकरोति ।

तन्मतेन सूत्रस्यायमर्थ: –

- विभावै: - ललनोद्यानप्रभृतिभि: आलम्बनोद्दीपनकारणै:, स्थायी रत्यादिको भावो जनित:, अनुभावै: – कटाकाषविक्षेपादिभि: कार्यै: प्रतीतियोग्य: कृत:, व्यभिचारिभिश्च – निर्वेदादिभि: सहकारिभि: उपचित:, मुख्यया वृत्त्या रामादौ अनुकार्ये वर्तमान:, तद्रूपतानुसन्धानात् नर्तकेऽपि प्रतीयमानो रत्यादि: स्थायी रस: ।
- एतन्मतेन संयोगशब्दस्य सम्बन्ध इत्यर्थ: । स च विभावस्य रत्यादिरूपेण रसेन जन्यजनकभाव:, अनुभावेन ज्ञाप्यज्ञापकभाव:, व्यभिचारिणा तु पोष्यपोषकभाव इति विशेष: । निष्पत्तिरित्यस्य उपचय: इत्यर्थ: । स च विभावादिपक्षे क्रमेण उत्पत्ति: ज्ञप्ति: पुष्टिश्च ।
- मतेनास्य रसो वस्तुतो रामादौ वर्तते । स च यद्यपि सम्प्रति न साक्षात् कर्तुं न शक्यते तथापि रामाद्यनुकारिणि नटे तस्यारोप: सम्भवतीति साक्षात्कारस्तस्य सुलभ: । एवं रत्यादेरारोपादेव चमत्कार: सहृदयानाम् । अत एव च काव्ये तेषां प्रवृत्तिरिति बोध्यम् ।




Main Philosophical Influence – *Pūrva-mīmāṁsā*

(In naming)

Other Philosophical Influence – *Uttara-mīmāṁsā* & *Nyāya*

*Nyāya* (Saṁyoga-sambandha)

*Uttara-mīmāṁsā* (Āropa / Adhyāropa)

**Anukartā** → **Anukārya** → **Sāmājika**

Actor (Naṭa)
Utpādya (Sthāyibhāva & Rasa)
Gamya (Sthāyibhāva & Rasa)
Poṣya (Sthāyibhāva & Rasa)

Character (Caritra)
Utpādaka (Vibhādi)
Gamaka (Anubhāva)
Poṣaka (Vyabhicāri)

IMITATION (*ANUKARAṆA*) PLAYS KEY ROLE IN PRODUCTION OF *RASA*

*RASA* IS *FORMED* OR *DERIVED*

उपचितः (STHĀYĪ) रसः - ***NIṢPATTI*** IS PRODUCTION OF *RASA*

## Criticism :

Rasa is only in *anukārya*

Lack of *rasa* either in *naṭa (anukartā)* or sāmājika (connoisseur)

# Criticisms

Cocepts related to *Apurva* ***(the useen result)*** and *Adhyāsa* ***(the super imposition / erroneousness / attribution)***

*प्रमाणान्तरविषयीकरणम् अपूर्वता*

अध्यासश्च विना बेतुं न लोक उत्पद्यते

- Concept of *anukaraṇa* cannot be justified every time

# *Anumitivāda of* Bhaṭṭaśaṅkuka

Selected text from – ***Abhinavabharatī*** of **Abhinavagupta:**

एतन्नेति श्रीशङ्कुकः। विभावाद्ययोगे स्थायिनो लिङ्गाभावेनावगत्यनुपपत्तेः भावानां पृथक् पूर्वमभिधेयताप्रसङ्गात्। स्थितदशायां लक्षणान्तरवैयर्थ्यात्। मन्दतरतममाध्यस्थ्याद्यानन्त्यापत्तेः। हास्यरसे षोढात्वाभावप्राप्तेः। कामावस्थासु दशस्वसङ्ख्यरसभावादिप्रसङ्गात्। शोकस्य प्रथमं तीव्रत्वं कालात्तनुमान्द्यदर्शनं क्रोधोत्साहरतीनाममर्षस्थैर्यसेवाविपर्यये ह्रासदर्शनमिति विपर्ययस्य दृश्यमानत्वाच्च।

तस्माद्धेतुभिर्विभावाख्यैः कार्यैश्चानुभावात्मभिः सहचारिरूपैश्च व्यभिचारिभिः प्रयत्नार्जिततया कृत्रिमैरपि तथानभिमन्यमानैरनुकर्तृस्थत्वेन लिङ्गबलतः प्रतीयमानः स्थायी भावो मुख्यरामादिगतस्थाय्यनुकरणरूपः। अनुकरणरूपत्वादेव च नामान्तरेण व्यपदिष्टो रसः।

# व्यञ्जनाम् अनङ्गीकुर्वन्नयम् अनुमानेनैव रसप्रतीतिमुपपादयति ।

तन्मतेन सूत्रस्यायमर्थः –

- 'राम एवायम्' 'अयमेव रामः' इति सम्यक् प्रतीतिः
- न रामोऽयम् इति औत्तरकालिके बाधे 'रामोऽयम्' इति मिथ्याप्रतीतिः
- 'रामः स्यान्न वा अयम्' इति संशयप्रतीतिः
- 'रामसदृशोऽयम्' इति सादृश्यप्रतीतिश्चेति
- यावत्यः प्रतीतयो वर्तन्ते वर्तते ताभ्यः सर्वाभ्योऽपि विलक्षणा काचित् प्रतीतिः चित्रतुरगन्यायेन सहृदये सम्भवति ।
- तया विलक्षणया प्रतीत्या 'रामोऽयम्' इति विषयीकृते नटे पक्षे, विभावादिभिः – नटेन प्रकाशितैः कारणकार्यसहकारिभिः कृत्रिमैरपि अकृत्रिमतया गृहीतैः अत एव विभावादिशब्दव्यपदेश्यैः, संयोगात् – गम्यगमकभावसम्बन्धात्, अनुमीयमानोऽपि वस्तुसौन्दर्यबलात् आस्वाद्यमानः, अत एव अनुमेयवह्न्यादिपदार्थान्तरात् विलक्षणो यो रत्यादिः स रसः ।
- यद्यप्ययं रत्यादिः नटे नास्ति तथापि रामत्वेन गृहीते तस्मिन् अनुमितो भवति, स्ववासनाबलाच्च आस्वाद्यमानो भवतीति विशेषः ।
- अस्य मतेन संयोगशब्दस्य अनुमाप्यानुमापकभावः सम्बन्ध इत्यर्थः, निष्पत्तिशब्दस्य च अनुमितिः । विभावाद्यर्थत्रयस्य व्यञ्जकत्वादिकम् अन्यैरुच्यते अस्य तु मतेन हेतुत्वमिति विशेषः ।
- ततश्च पुरोवर्ती विलक्षणप्रतीतिविषयोऽयं रामः सीताविषयकरतिमान्, तद्विषयककटाक्षविक्षेपादिमत्त्वात् इत्याकारा अनुमितिर्भवति सहृदयस्य । तथा प्रतीतस्य रत्यादेः पुनः पुनः अनुसन्धानादेव चमत्कारः ।

# Bhaṭṭaśaṅkuka – *ANUMITIVĀDA* (Theory of Inference)

| | विभावानुभाव-व्यभिचारि-संयोगाद्रसनिष्पत्तिः | | |
|---|---|---|---|
| **Pakṣa** | Sādhana (Hetu) | Sādhya | |
| | Anumāpaka | Anumāpya | Niṣpatti |
| **Naṭa** | Vibhāvādi | Sthāyibhāva & Rasa | Anumiti |

# *Anumitivāda of* **Bhaṭṭaśaṅkuka**

Main Philosophical Influence – *Nyāya*

(In naming and theory inference)

- Rasa as inference
- *Vibhāva* etc as *hetu* (sign) of inference
- *Sthāyi* exists in original character
- Actor imitates the *sthāyi* through his acting
  (Anumāna is possible for imitation)
- Rasa is ***anumia*** *by* Connoisseur due to imitation
- *Vibhāvas* are not real but represented as through artificial efforts
- *Anubhavas appear due to śikṣā or proper training*
- *Vyabhicāris* are manifested

Dr. Sudip Chakravortti, Department of Sanskrit, Sidho-Kanho-Birsha University

# चित्र-तुरग-न्याय

## Repressentation through Horse-Painting

Dr. Sudip Chakravortti, Department of Sanskrit, Sidho-Kanho-Birsha University



BY SEEING A PAINTED PICTURE OF HORSE, WE IMAGINE A HORDE OF PRACTCAL WORLD. THIS IS POSSIBLE DUE TO ĀROPA OR RŪAPKA.

HERE ARE FEW STAGES FOR SUCH KIND OF INFERENCE -

Apart from worldly experience, the experience through artistic aesthetic pleasure was accepted by Bhaṭṭaśaṅkuka.

He is the Sītā or similar to Sītā is the understanding of connoisseur.

Sahr̥daya infers rasa in actor (anukartā)

| Samyak pratīti | This is the horse | This is the Sītā |
|---|---|---|
| Mithyā Pratīti | This is not the horse | This is not the Sītā |
| Saṁśaya Pratīti | Is this horse or any other thing? | Whether is she Sītā or not? |
| Sādr̥śya Pratīti | This is similar to this horse | She is similar to Sītā |

# Criticism

- Actor imitates and inference is being done by the shr̥daya. Again, rasa is in actor – that may not be true
- Imitation is real or not, that is unknown unless both actor and connoisseur know the same.
- How a work (Kārya) like immitation can be rasa?
- Except acotor, other spectator experience *rati* and *viyoga*
- Apart ffrom *anukaraṇa hr̥dayasaṁvādabhājitva* necessary for *rasanishpatti*
- Rasa cannot be inferred but *abhivyakta*.

# Bhaṭṭnāyaka – *BHUKTIVĀDA*
## Selected text from – ***Abhinavabharatī*** **of Abhinavagupta:**

भट्टनायकस्त्वाह—रसो न प्रतीयते। नोत्पद्यते। नाभिव्यज्यते। स्वगतत्वेन हि प्रतीतौ करुणे दुःखित्वं स्यात्। न च सा प्रतीतिर्युक्ता। सीतादेरविभावत्वात् स्वकान्तास्मृत्यसंवेदनात्। देवतादौ साधारणीकरणायोग्यत्वात्। समुद्रलङ्घनादेर-

साधारण्यात्। न च तद्वतो रामस्य स्मृतिः। अनुपलब्धत्वात्। न च शब्दानुमानादिभ्यः तत्प्रतीतौ लोकस्य सरसताऽपि युक्ता, प्रत्यक्षादिव नायकयुगलकावभासे हि प्रत्युत लज्जाजुगुप्सास्पृहादिस्वोचितचित्तवृत्त्यन्तरोदयव्यग्रतयाकाशरसत्वमथापि

स्यात्। तन्न प्रतीतिरनुभवस्मृत्यादिरूपा रसस्य युक्ता। उत्पत्तावपि तुल्यमेतद्दूषणम्। शक्तिरूपत्वेन पूर्वं स्थितस्य पश्चादभिव्यक्तौ विषयार्जनतारतम्यापत्तिः। स्वगतत्वपरगतत्वादि च पूर्ववद्विकल्प्यम्।

तस्मात्काव्ये दोषाभावगुणालङ्कारमयत्वलक्षणेन, नाट्ये चतुर्विधाभिनयरूपेण निबिडनिजमोहसङ्कटकारिणा विभावादिसाधारणीकरणात्मनाऽभिधातो ऽद्वितीये-

# Bhaṭṭnāyaka – *BHUKTIVĀDA*

## Selected text from – ***Abhinavabharatī*** **of Abhinavagupta:**

नांशेन भावकत्वव्यापारेण भाव्यमानो रसोऽनुभवस्मृत्यादिविलक्षणेन रजस्तमोऽनु-वेधवैचित्र्यबलाद् द्रुतिविस्तारविकासलक्षणेन सत्त्वोद्रेकप्रकाशानन्दमयनिजसंविद्वि-श्रान्तिलक्षणेन परब्रह्मास्वादसविधेन भोगेन परं भुज्यत इति ।

"अभिधा भावना चान्या तद्भोगीकृतिरेव च ।
अभिधाधामतां यातः शब्दार्थालङ्कृती, ततः ॥
भावनाभाव्य एषोऽपि श्रृङ्गारादिगणोऽभवत् ।
तद्भोगीकृतिरूपेण व्याप्यते सिद्धिमान्नरः ॥" ) इति ।

यत् "काव्येन भाव्यन्ते रसाः" इत्युच्यते तत्र विभावादिजनितचर्वणात्म-कास्वादरूपप्रत्ययगोचरतापादनमेव यदि भावनं तदभ्युपगम्यत एव ।

# अस्य मतेन रसे विषये भावकत्वं भोजकत्वं भोगीकृतिश्चेति
तस्यायमाशय: -

काव्ये ये शकुन्तलादय: शब्दा: प्रयुज्यन्ते तै: प्रथमम् अभिधाव्यापारेण शकुन्तलात्वादिविशिष्ठतया शकुन्तलादयोऽर्था उपस्थाप्यन्ते ।

उपस्थापिताश्च तेऽर्था: यद्यपि दुष्यन्तादिमात्रसम्बन्धित्वात् असाधारणा: तथापि द्वितीयेन भावकत्वव्यापारेण ते सवेऽप्यर्था: स्त्रीत्वादिसाधारणधर्मविशिष्ठतया पुन: प्रतीयन्ते ।

एवं शकुन्तलादिषु सवेर्ष्वपि अथेर्षु साधारणीभूतेषु सत्सु, य: शकुन्तलादि: पूर्वं सहृदयनिष्ठरत्यादिं प्रति अनालम्बनमासीत् सम्प्रति स एव शकुन्तलादि: तमेव सहृदयनिष्ठरत्यादिं प्रति आलम्बनं सम्पद्यते । तदनु तृतीयेन भोजकत्वव्यापारेण तादृश: कश्चित् भोग: सम्भवति यस्मिन् विषयीभूतो रत्यादि: रस इत्युच्यते ।

भोगश्च सत्त्वगुणस्य उद्रेके सति स्फुटीभवन् य आनन्द: तद्विशिष्ठा या बुद्धि: तद्विश्रान्तिरूप: ।

अयं तावत् सूत्रार्थ: – विभावानुभावव्यभिचारिणाम् - तदाख्यानामर्थानां संयोगात् - भावकत्वव्यापारेण साधारणतया भावनात् रसस्य - सहृदयनिष्ठस्य रत्यादे: निष्पत्ति: - भोगे विषयीकृति: ।

सांख्यानां मतेन प्रकृति: सत्त्वादिगुणशालिनी तद्विकारभूताश्च बुद्ध्यादय: ।

ततश्च विभावादीनामर्थानां साधारणतया ज्ञाने सति सत्त्वगुणस्योद्रेको भवति, तेन तदात्मिकबुद्धे: वेद्यान्तरस्पर्शशून्यत्वरूपा विश्रान्तिरपि भवति ।

अयमेव भोग: । अस्मिन् विषयीभूतो रत्यादि: स्थायी भावो रस इत्यभिप्राय: । मतेनास्य संयोगात् इत्यस्य भावनमित्यर्थ:, निष्पत्तिरित्यस्य च भोगाख्यानुभवस्य विषयीभवनम् ।

सांख्यानां मतेन विषयाभिमुख्ये सति पुरुषेण प्रकृते: तद्विकारभूतस्य सर्वस्यापि पदार्थजातस्य भोग: वैमुख्ये तु मुक्ति: इत्यङ्गीक्रियते ।

एवं च तन्मतेन पुरुषो भोजक:, प्रकृति: भोग्या, तेन हि तस्या भोग: इत्येषा त्रिपुटी सम्भवति । तादृशो भोग इह वर्तते इति अयं सांख्यमतानुयायित्वेन निश्चीयते ।

# Bhaṭṭnāyaka – *BHUKTIVĀDA* (Theory of Universal Enjoyment)

1 Bhāvana → 2 Sādhāraṇikraṇa → 3 Bhoga of Rasa

**Sādhāraṇīkaraṇa**

↓

1. **Anukārya**
2. **Anukartā**
3. **Sāmājika / Sahṛdaya**

**विभावानुभाव-व्यभिचारि-संयोगाद्रसनिष्पत्तिः**

| Bhojaka | Bhojya | Niṣpatti |
|---|---|---|
| ↓ | ↓ | ↓ |
| Vibhāvādi | Sthāyibhāva | Bhukti |

***BHUKTIVĀDA*** (Theory of **Universal Enjoyment**)

Main Philosophical Influence – *Sāṁkhyadarśana* (In naming and theory)

Other Philosophical Influence – *Nyāya* (Saṁyoga-sambandha)

**&** *Pūrvamīmāṁsā* (Bhāvanā)

**Process of Universaliastion (साधारणीकरणम्)**

1. कादम्बरी-रसाज्ञानमाहारोऽपि न रोचते

**Tagore –**

"কাদম্বরী পড়িতে বসিলে ভুলিতে হইবে আপিসের বেলা হইয়াছে"

2. **Practical World –**

**During enjoying a Film one forgets to catch the train in time**

| | | | | |
|---|---|---|---|---|
| Abhidhā | → | **Sādhāraṇīkaraṇa** | → | Śabda & Artha |
| Bhāvakatva | → | **Sādhāraṇīkaraṇa** | → | Vibhāvādi |
| Bhojakatva | → | **Sādhāraṇīkaraṇa** | → | Sahṛdaya |

# Bhaṭṭṇāyaka – *BHUKTIVĀDA* (Theory of **Universal Enjoyment**)

- *Rasa* may not be experienced (*na-utpadyate*), production *(na-anumīyate)* or suggestion *(na-abhi-vyajyate)* but universally enjoyed (*bhujyate*)
- *Sādhāraṇīkaraṇa* and *bhāvanā* create the path to enjoy *Rasa*
- Neither one's own experience nor someone else's experience
- conventional meaning (*abhidhā*) instigates emotional content (*bhāvana – bhāvakatva vyāpāra*) which is responsible to convey (*bhukti - bhojakatva vyāpāra*) rasa to the connoisseur

# Evaluation of *Bhuktivāda*

- Theory of *Sādhāraṇikaraṇa* is remarkable introduction in *rasa theory*
- *Bhāvanā* in aesthetic realisation is also new one
- *Bhoga / Bhukti* is mundane (*laukika*) – so question arises how *rasa* can be non-mundane (*alaukika*)?
- Refutation of suggestive sense (*dhvani / vyañjanā*) may not be accepted

# Abhinavagupta – *ABHIBYAKTIVĀDA*

## Selected text from – ***Abhinavabharatī*** **of Abhinavagupta:**

यत्तूक्तम्—

"संवेदनाख्यया व्यङ्ग्यः परसंवित्तिगोचरः ।
आस्वादनात्माऽनुभवो रसः काव्यार्थ उच्यते ॥" इति ।

तत एव न परिमितमेव साधारण्यम् । अपि तु विततम् । व्याप्तिग्रह इव धूमाग्न्योः । भयकम्पयोरेव वा । तदत्र साक्षात्कारायमाणत्वे परिपोषिका नटादि-सामग्री । यस्यां वस्तुसतां काव्यार्पितानां च देशकालप्रमात्रादीनां नियम-हेतूनामन्योन्यप्रतिबन्धबलादत्यन्तमपसरणे स एव साधारणीभावः सुतरां पुष्यति । अत एव सर्वसामाजिकानामेकघनतयैव प्रतिपत्तिः सुतरां रसपरिपोषाय । सर्वेषाम-नादिवासनाचित्रीकृतचेतसां वासनासंवादात् । सा चाविघ्ना संवित् चमत्कार

तत्र ये स्वभावतो निर्मलमुकुरहृदयास्त एव संसारोचितक्रोधमोहाभिलाषपर-वशमनसो न भवन्ति । तेषां तथाविधदशरूपकाकलनसमये साधारणरसनात्मक-चर्वणग्राह्यो रससञ्चयो नाट्यलक्षणः स्फुट एव । ये त्वतथाभूतास्तेषां प्रत्यक्षोचित-तथाविधचर्वणालाभाय नटादिप्रक्रिया । स्वगतक्रोधशोकादिसङ्कटहृदयग्रन्थिभञ्जनाय गीतादिप्रक्रिया च मुनिना विरचिता । सर्वानुग्राहकं हि शास्त्रमिति न्यायात् । तेन नाट्य एव रसा न लोक इत्यर्थः । काव्यञ्च नाट्यमेव ।

एतेषामर्थानां सहृदयनिष्ठभावनाबलेन साधारणतया प्रतीतिः भवति । साधारणतया प्रतीतिर्नाम स्वमात्रसम्बन्धित्वेन परमात्रसम्बन्धित्वेन प्रतीत्यभावः यद्वा स्वसम्बन्धित्वेन परसम्बन्धित्वेन च प्रतीतिः।

तदुक्तं दर्पणकारेण –

परस्य न परस्येति मएति न ममेति च ।

- मतेनास्य सूत्रास्यायमर्थः – शकुन्तलादीनाम् आलम्बनविभावानाम्, चन्द्रिकादीनाम् उद्दीपनविभावानाम्, कटाखविक्षेपादीनाम् अनुभावानाम्, लज्जदीनां च व्यभिचारिणां संयोगात् समावेशात् सहृदयस्य चित्ते संस्काररूपेण स्थितस्य रसस्य रत्यादिरूपस्य निष्पत्तिः अभिव्यक्तिः ।
- काव्ये कारणकार्यसहकारिरूपा येऽर्थाः प्रतिपाद्यन्ते क्रमेण तेषां विभावादिशब्देन व्यपदेशः ।
- तदास्वादे विभावादेः परिच्छेदो न विद्यते।
- तथा प्रतीतैरर्थैः सहृदयस्य चित्ते वासनारूपेण स्थितः रत्यादिः अभिव्यक्तो भवति । सोऽयमभिव्यक्तः सहृदयस्य चित्ते वासनारूपेण स्थितो यो रत्यादिः स एव रसः ।
- न च शकुन्तलादिः सहृदयनिष्ठरत्यादिं प्रति कथमालम्बनं भवतीति वाच्यम्, शकुन्तलात्वेन अनालम्बनत्वेऽपि स्त्रीत्वेन आलम्बनत्वे बाधकाभावात् ।
- एतादृशो रसः न कार्यः, विभावादिनाशेऽपि तत्सम्भवप्रसङ्गात् ।
- कार्यो हि पदार्थः कारणनाशेऽपि तिष्ठति । नह्ययं तथा, विभावादिनाशे तत्प्रतीत्यभावात् ।
- नापि ज्ञाप्यः, सिद्धस्य तस्याभावात् । सिद्ध एव हि कश्चित् पदार्थो दीपादिना पदार्थान्तरेण ज्ञाप्यो भवितुं शक्नोति। तदेवं कार्यत्वज्ञाप्यत्वयोरभावात् पदार्थोऽयं विलक्षण इति मन्तव्यम् ।
- यद्येवं सूत्रे निष्पत्तिः इत्येतत् कथं युज्यते? – रत्यादिविषयिका या चर्वणा तस्या निष्पत्तौ तद्रूपस्य रसस्यापि निष्पत्तिः इत्यभ्युपगमात् । तत्र व्याघ्रादयः भयानकस्येव वीरादेरपि विभावा भवन्तीति नियतस्य कस्यचिद्रसस्य निष्पत्तिः न स्यादिति विभावादीनां त्रयाणामप्यर्थानां सूत्रे ग्रहणमिति ।

# Abhinavagupta – *ABHIBYAKTIVĀDA*
# (Theory of Revelation)

1. Pre-existed psychological emotions **(Vāsanā)**
2. Sādhāraṇikraṇa
3. Abhi-yañjanā of Rasa

**Sādhāraṇīkaraṇa**

1. **Anukārya**
2. **Anukartā**
3. **Sāmājika / Sahṛdaya**

## विभावानुभाव-व्यभिचारि-संयोगाद्रसनिष्पत्तिः

| Vyañjaka | Vyañgya | Niṣpatti |
|---|---|---|
| ↓ | ↓ | ↓ |
| Vibhāvādi | Sthāyibhāva | Abhivyakti |

# Abhinavagupta – *ABHIVYAKTIVĀDA* (Theory of **Revelation**)

Main Philosophical Influence –

*Vedāta* (In naming and theory)

**Some Says -** *Śaiva-darśana* (A propagator of Śaivisim)

Other Philosophical Influence –

*Nyāya* (Saṁyoga-sambandha)

& *Sāṁkhya* (Sādhāraṇikaraṇa)

- ***Vibhāva*** **Instrument**
- ***Anubhāva*** **Reliable Feelings**
- ***Vyabhicāri*** **Robust**
- ***Saṁyoga*** **Balanced employment of word and meaning**
- ***Abhivyakti*** **in mirror like heart of Connoisseur**

# Evaluation of *Abhibyaktivāda*

- Explained on the basis of *Dhvani* theory
- *Sādhāraṇikarṇa* was accepted by him
- Pre-exiting *Vāsanā* (psychological elements) is important
- *Rasa* is reveled in connoisseur (*sahṛdaya*) only
- *Rasa-carvaṇā* is like one kind of self realisation *(ātma-caitanya)* which may be compared like meeting with the brother of Brahmā *(brahma-sākṣātkāra-sahodara)*
- Lies ample scope of appearance different meanings (even non-desirable) and senses as Abhinavagupta relies on Vyañjana

## विश्वनाथ का मतः

आचार्य विश्वनाथ ने सग्रंह और व्यवस्था दोनों ही द ष्टियों से रस के स्वरूप को सर्वमान्य निष्कर्ष तक पहुँचने में महत्त्वपूर्ण योग दिया है। उनके मतानुसार रस का स्वरूप इस प्रकार है।

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**
**वेद्यान्तरस्पर्शशून्योब्रह्मास्वाद सहोदरः।।**
**लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमात भिः।**
**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः।**

अर्थात् चित्त में सतोगुण के उद्रेक की स्थिति में विशिष्ट संस्कारवान सहृदयजन अखण्ड, स्वप्रकाश और आनन्दमय, चिन्तमय, अन्य सभी प्रकार के ज्ञान से विनिर्मुक्त ब्रह्मास्वाद-सहोदर, लोकोत्तर, चमत्कार प्राणरस का निज रूप से अभिन्नतः आस्वादन करते हैं।

इस परिभाषा के अनुसार-

1. रस आस्वादन का विषय है अर्थात् रस आस्वाद से अभिन्न है।
2. रस का आविर्भाव सतोगुण के उद्रेक की स्थिति में होता है। यह आस्वाद ऐन्द्रिय उत्तेजना आदि से भिन्न सात्त्विक या परिष्कृत कोटि का होता है। मूलतः यह स्थापना भट्टनायक की है। अभिनव और विश्वनाथ ने इसे प्रायः यथावत् स्वीकार कर लिया है।
3. रस अखण्ड है अर्थात् एक तरु तो रसानुभूति में विभाव, अनुभाव और व्यभिचारी आदि की प थक् अनुभूति नहीं होती अपितु सभी को समंजित अनुभूति होती है।
4. रसानुभव अन्य ज्ञान या अनुभव से रहित है क्योंकि रस पूर्ण तन्मय भाव की स्थिति है और इस स्थिति में स्वभाव से अन्य ज्ञान की सम्भावना नहीं है।
5. रस स्वप्रकाशानन्द और चिन्मय अर्थात् आत्म चैतन्य से प्रकाशित आनन्दमयी चेतना है। इसमें ऐन्द्रिक अनुभूति का प्रायः अभाव तथा चैतन्य आत्मास्वाद का सद्भाव रहता है।
6. रस लोकोत्तर चमत्कार प्राण है। वह न प्रत्यक्ष अनुभव है न परोक्ष अपितु अनिर्वचनीय और अलौकिक है। अलौकिक का अर्थ अति प्राक तिक न लेकर अतीन्द्रिय लेना चाहिए।
7. ब्रह्मास्वाद सहोदर है अर्थात् विषयानन्द से भिन्न है। वह इन्द्रियों का विषय न होकर चैतन्य आत्म का विषय है, किन्तु फिर भी वह शुद्ध ब्रह्मानन्द नहीं है।

# Mentionable New Concept - Bhrāntivādaḥ

- मतमेतत् रसङ्गाधरे निरूपितम् । नवीनशब्देन केषां ग्रहणमिति न ज्ञायते, मतस्यास्य ग्रन्थान्तरे एतावन्तं कालम् अदर्शनात् । अयमभिप्राय: –
- शकुन्तलादे: आलम्बनविभावस्य, चन्द्रिकादेरुद्दीपनविभावस्य, स्तम्भरोमाञ्चादे: अनुभावस्य, लज्जादेश्च व्यभिचारिण: संयोगात् भावनाख्यरूपदोषविशेषात् आनुकार्याभिन्नतया निर्णीते स्वस्मिन् सहृदयस्य प्रतीतो रत्यादि: स्थायी भावो रस: ।
- ननु तत्र शकुन्तलादि: दुष्यन्तादिं प्रत्येव आलम्बनम् न सहृदयस्येति स्थिते कथं तस्य तदालम्बनको रत्यादि: सम्भवति? – उच्यते, यदा सहृदय: काव्यमभिनीयमानं पश्यति गीयमानं वा श्रृणोति तदा स आत्मानं दुष्यन्तत्वेन अवगच्छति भावनारूपदोषवशात् ।
- यद्यपि भावनाया: काव्यार्थानुसन्धारूपाया लोके गुणत्वेन परिगणिताया अयथार्थप्रतीतिजनकत्वात् दोषत्वेन स्वीकार:, यथा - लोके गुणत्वेन परिगणितस्यापि चाकचिक्यस्य रजतज्ञानजनकत्वात् दोषत्वेन स्वीकार: । तदेवं दुष्यन्ताभिन्नत्वेन आत्मनोऽवगमने सति दुष्यन्तस्य यदालम्बनं तदस्यापि आलम्बनं सम्पद्यते इति सहृदयस्य शकुन्तलाद्यालम्बनकस्य रत्यादे: निर्विघ्नं सिद्धि: ।
- न चैवं सति हरिश्चन्द्रचरितप्रधाने काव्ये सहृदयेन आत्मनो हरिश्चन्द्रत्वेन अवगमनात् तस्येव सहृदयस्यापि शोक एव जायेत । तेन दु:खजनकत्वात् तादृशे काव्ये सहृदयस्य प्रवृत्तिरपि न स्यादिति चेत् – सत्यम्, अत्रोच्यते, सत्यस्यैव हि शोकादे: दु:खजनकत्वम् न तु भ्रान्त्या गृहीतस्येति ।
- यद्येवम्, श्रृङ्गारादिप्रधानेऽपि काव्ये आत्मनो दुष्यन्तादित्वेन ग्रहणात् रत्यादे: सुखजनकत्वं न स्यात्? – तत्रेदमुत्तरम् -
- करुणाादिप्रधाने काव्ये यदि सुखमेव सहृदयस्य अनुभवसिद्धं तर्हि व्यञ्जनाव्यापारस्य शोकजन्यं दु:खं प्रति प्रतिबन्धकत्वमपि अङ्गीक्रियते । अथ सुखमिव दु:खमप्यनुभवसिद्धम् तर्हि शोकात् दु:खम् व्यञ्जनाव्यापाराच्च सुखमिति सर्वमपि उपपन्नं भवति । न च दु:खस्याप्यनुभवात् सहृदयस्य तत्राप्रवृत्ति: स्यादिति वाच्यम्, सुखस्य आधिक्यात् प्रवृत्ते: सम्भवात् ।
- न चास्मिन् मते भावनाया दोषत्वमिति यत् निर्णीतं तदसह्यमिति मन्तव्यम्, परमतेऽपि अविद्यमानस्य साधारणीकरणस्य तज्जन्यत्वेन अङ्गीकारात् ।
- नहि समेषां पदार्थानां साधारणत्वकल्पनात् केनचिदेकेन अभेदस्य कल्पनं गौरवाय भवति ।
- तस्मात् भ्रान्त्या तदभेदस्यैव कल्पनं कृतमिति ।

Dr. Sudip Chakravortti, Department of Sanskrit, Sidho-Kanho-Birsha University

अलमतिविस्तरेण

धन्यवादः